# सीताष्टोत्तरशतनामस्तोत्रम् २

sItAShTottarashatanAmastotram 2

sanskritdocuments.org

April 20, 2019

# sItAShTottarashatanAmastotram 2

# सीताष्टोत्तरशतनामस्तोत्रम् २

## Sanskrit Document Information

Text title : sItAShTottarashatanAmastotram 2

File name : sItAShTottarashatanAmastotram2.itx

Category : devii, aShTottarashatanAma, sItA

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : brahmayAmala shrIrAmarahasya

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 20, 2019

*sanskritdocuments.org*

# सीताष्टोत्तरशतनामस्तोत्रम् २

सीता सीरध्वजसुता सीमातीतगुणोज्ज्वला ।
सौन्दर्यसारसर्वस्वभूता सौभाग्यदायिनी ॥ १॥

देवी देवार्चितपदा दिव्या दशरथस्नुषा ।
रामा रामप्रिया रम्या राकेन्दुवदनोज्ज्वला ॥ २॥

वीर्यशुल्का वीरपत्नी वियन्मध्या वरप्रदा ।
पतीव्रता पङ्क्तिकण्ठनाशिनी पावनस्मृतिः ॥ ३॥

वन्दारुवत्सला वीरमाता वृतरघूत्तमा ।
सम्पत्करी सदातुष्टा साक्षिणी साधुसम्मता ॥ ४॥

नित्या नियतसंस्थाना नित्यानन्दा नुतिप्रिया ।
पृथ्वी पृथ्वीसुता पुत्रदायिनी प्रकृतिः परा ॥ ५॥

हनुमत्स्वामिनी हृद्या हृदयस्था हताशुभा ।
हंसयुक्ता हंसगतिः हर्षयुक्ता हतासुरा ॥ ६॥

साररूपा सारवचाः साध्वी च सरमाप्रिया ।
त्रिलोकवन्द्या त्रिजटासेव्या त्रिपथगार्चिनी ॥ ७॥

त्राणप्रदा त्रातकाका तृणीकृतदशानना ।
अनसूयाङ्गरागाङ्काऽनसूया सुरिवन्दिता ॥ ८॥

अशोकविनिकास्थानाऽशोका शोकविनाशिनी ।
सूर्यवंशस्नुषा सूर्यमण्डलान्तःस्थवल्लभा ॥ ९॥

श्रुतमात्राघहरणा श्रुतिसन्निहितेक्षणा ।
पुष्पप्रिया पुष्पकस्था पुण्यलभ्या पुरातना ॥ १०॥

पुरुषार्थप्रदा पूज्या पूतनाम्नी परन्तपा ।
पद्मप्रिया पद्महस्ता पद्मा पद्ममुखी शुभा ॥ ११॥

जनशोकहरा जन्ममृत्युशोकविनाशिनी ।
जगद्रूपा जगद्वन्द्या जयदा जनकात्मजा ॥ १२॥

नाथनीयकटाकाक्षा च नाथा नाथैकतत्परा ।
नक्षत्रनाथवदना नष्टदोषा नयावहा ॥ १३॥

वह्निपापहरा वह्निशैत्यकृद्वृद्धिदायिनी ।
वाल्मीकिगीतविभवा वचोऽतीता वराङ्गना ॥ १४॥

भक्तिगम्या भव्यगुणा भान्ती भरतवन्दिता ।
सुवर्णाङ्गी सुखकरी सुग्रीवाङ्गदसेविता ॥ १५॥

वैदेही विनताघौघनाशिनी विधिवन्दिता ।
लोकमाता लोचनान्तःस्थितकारुण्यसागरा ॥

श्रीरामवल्लभा सा नः पायादार्तानुपाश्रितान् ॥ १६॥

कृताकृतजगद्धेतुः कृतराज्याभिषेकका ।
इदमष्टोत्तरशतं सीतानाम्नां तु या वधुः ॥ १७॥

धनधान्यसमृद्धा च दीर्घसौभाग्यदर्शिनी ।
पुंसामपि स्तोत्रमिदं पठनात्सर्वसिद्धिदम् ॥ १८॥

इति ब्रह्मयामले रामरहस्यगतं सीताष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*sItAShTottarashatanAmastotram 2*
pdf was typeset on April 20, 2019

Please send corrections to *sanskrit@cheerful.com*